| | | |
|---|---|---|
| **Roll No.** | **:** | |
| **Unique Paper Code** | **:** | **121302310** |
| **Title of the Paper** | **:** | **निरुक्त एवं भारद्वाज श्रौतसूत्र** |
| | | **Nirukta & Bharadwaj Srautasutra** |
| **Name of the Course** | **:** | **M.A. Sanskrit, LOCF, January-2024** |
| **Group:** | **:** | **A** |
| **Semester** | **:** | **III** |
| **Duration** | **:** | **3 Hours** |
| **Maximum Marks** | **:** | **70** |

इस प्रश्नप्रत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमाँक लिखिए।

Write your Roll No. on the top immediately on receipt of this question paper

**टिप्पणी:** अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर **संस्कृत** या **हिन्दी** या **अंग्रेजी** किसी एक भाषा में दीजिए, परन्तु सभी प्रश्नों का माध्यम एक ही होना चाहिए।

**Note:** Unless otherwise required in a question, answers should be written in **Sanskrit** or in **Hindi** or in **English** but the same medium should be used throughout the paper.

1. निम्नलिखित की व्याख्या कीजिए, जिनमें से किसी एक की व्याख्या संस्कृत में हो। **7x4 = 28**

   Explain the following, out of which one should be in Sanskrit.

**क.** अयमेवाग्निर्द्रविणोदा इति शाकपूणिः। आग्नेयेष्वेव हि सूक्तेषु द्राविणोदसाः प्रवादा भवन्ति। देवा अग्निं धारयन्द्रविणोदाम्। यथो एतत् स बलधनयोर्दातृतम इति सर्वासु देवतास्वैश्वर्यं वर्तते। यथो एतत् – "ओजसो जातमुत मन्य एनम्" इति चाहेति, अयमप्यग्निरोजसा बलेन मथ्यमानो जायते तस्मादेनमाह – सहसस्पुत्रं सहसः सूनुं सहसो यहुम्।

**अथवा/OR**

नरांशसो यज्ञ इति कात्थक्यः। नरा अस्मिन्नासीनाः शंसन्ति। अग्निरिति शाकपूणिः। नरैः प्रशस्यो भवति। तस्यैषा भवति –

नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः।
ये सुक्रतवः शुचयो धियन्धाः स्वदन्ति देवा उभयानि हव्या॥

**ख.** रुद्रो रौतीति सतो, रोरूयमाणो द्रवतीति वा। रोदयतेर्वा। यदरुदत्तद्रुद्रस्य रुद्रत्वमिति काठकम्। यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति हारिद्रविकम्। तस्यैषा भवति -

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने।
अषाह्ळाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः॥

**अथवा/OR**

पर्जन्यस्तृपेराद्यन्तविपरीतस्य। तर्पयिताजन्यः। परो जेता वा, जनयिता वा, प्रार्जयिता वा रसानाम्। तस्यैषा भवति –

वि वृक्षान्हन्त्युत हन्ति रक्षसो विश्वं बिभाय भुवनं महावधात्।
उतानागा ईषते वृष्ण्यावतो यत्पर्जन्यः स्तनयन्हन्ति दुष्कृतः॥

**ग.** सिनीवाली सिनमन्नं भवति, सिनाति भूतानि। वालं पर्व, वृणोतेस्तस्मिन्नन्नवती। वालिनी वा। वालेनेवास्यामणुत्वाच्चन्द्रमसः सेवितव्यो भवतीति वा। तस्यैषा भवति–

सिनीवालि पृथुष्टके या देवानामसि स्वसा।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः॥

**अथवा/OR**

तामश्विनौ प्रथमागामिनौ भवतः। अश्विनौ यद्व्यश्नुवाते सर्वं रसेनान्यो, ज्योतिषाऽन्यः। अश्वैरश्विनावित्यौर्णवाभः। तत्कावश्विनौ? द्यावापृथिव्यावित्येके। अहोरात्रावित्येके। राजानौ पुण्यकृतावित्यैतिहासिकाः। तयोः काल ऊर्ध्वमर्धरात्रात्प्रकाशीभावस्यानुविष्टम्भम्। अनुत्तमो भागो हि मध्यमः। ज्योतिर्भाग आदित्यः। तयोरेषा भवति –

वसातिषु स्म चरथोऽसितौ पेत्वाविव।
कदेदमश्विना युवमभिदेवाँ अगच्छतम्॥

**घ.** आग्नेयमष्टकपालं पुराणानां निरुप्यैन्द्राग्नमेकादशकपालं नावानां निर्वपति। द्वादशकपालमाग्नेन्द्रं वा। वैश्वदेवं चरुम्। पयसि शृतो भवति। सौम्यँ श्यामाकं चरुं द्यावापृथिव्यमेककपालम्। अपि वा नवान्येव निर्वपेत्। नाग्नेयम्।

**अथवा/OR**

विकृतिश्च दर्शपूर्णमासौ च। दर्शपूर्णमासयोर्विकृतेश्च संनिपाते दर्शपूर्णमासौ बलायाँसौ। यानि त्विष्टिपशुबन्धानां प्रत्यक्षश्रुताम्नातानि तत्र बलीयाँसि। त्रयोविँशतिदारुमिध्मं करोति। तत्रैषोऽत्यन्तप्रदेशः।

2. निम्नलिखित पर संक्षिप्त टिप्पणी लिखिए – **5x4=20**

   Write the short notes on the following:

   क. उषासानक्ता **अथवा/OR** वनस्पतिः
   ख. वरुणः **अथवा/OR** वास्तोष्पतिः
   ग. चन्द्रमाः **अथवा/OR** विष्णुः
   घ. पुरोडाशः **अथवा/OR** विकृतियागः

3. निम्नलिखित में से किन्हीं **तीन** के निर्वचन यास्क के अनुसार संस्कृत में दीजिए – **2x3 = 6**

   Give the etymology of any **three** of the following words in **Sanskrit** according to **Yaska**:
   आप्रियः, द्वारः, वायुः, क्षेत्रस्य पतिः, अज एकपात्, पूषा

4. किन्हीं **दो** पर आलोचनात्मक निबन्ध लिखिए - **8x2 = 16**

   Write a critical essay on any **two** of the following:

   क. तनूनपात्
   ख. इन्द्रः
   ग. सविता